# Shankaracharya Stava

# शङ्कराचार्य-स्तवः

## Document Information

Text title : Shankaracharya Stava

File name : shankarAchAryastavaH.itx

Category : deities_misc, gurudev, sanskritgeet

Location : doc_deities_misc

Acknowledge-Permission: Sringeri Math https://www.sringeri.net/

Latest update : May 13, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 13, 2025

*sanskritdocuments.org*

# शङ्कराचार्य-स्तवः

श्रीशङ्कराचार्यवर्यं सर्वलोकैकवन्द्यं भजे देशिकेन्द्रम् ॥ ध्रुवपदम्॥

धर्मप्रचारेऽतिदक्षं योगिगोविन्दपादाप्तसंन्यासदीक्षम् ।
दुर्वादिगर्वापनोदं पद्मपादादिशिष्यालिसंसेव्यपादम् ॥ १॥

शङ्काद्रिदम्भोलिलीलं किङ्कराशेषशिष्यालिसन्त्राणशीलम् ।
बालार्कनीकाशचेलं बोधिताशेषवेदान्तगूढार्थजालम् ॥ २॥

रुद्राक्षमालाविभूषं चन्द्रमौलीश्वराराधनावाप्ततोषम् ।
विद्राविताशेषदोषं भद्रपूगप्रदं भक्तलोकस्य नित्यम् ॥ ३॥

पापाटवीचित्रभानुं ज्ञानदीपेन हार्दं तमो वारयन्तम् ।
द्वैपायनप्रीतिभाजं सर्वतापापहामोघबोधप्रदं तम् ॥ ४॥

राजाधिराजाभिपूज्यं रम्यशृङ्गाद्रिवासैकलोलं यतीड्यम् ।
राकेन्दुसङ्काशवक्त्रं रत्नगर्भेभवक्त्राङ्घ्रिपूजानुरक्तम् ॥ ५॥

श्रीभारतीतीर्थगीतं शङ्करार्यस्तवं यः पठेद्भक्तियुक्तः ।
सोऽवाप्नुयात्सर्वमिष्टं शङ्कराचार्यवर्यप्रसादेन तूर्णम् ॥ ६॥

इति शङ्कराचार्यस्तवः सम्पूर्णः ।

*Shankaracharya Stava*

pdf was typeset on May 13, 2025

Please send corrections to *sanskrit@cheerful.com*